श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते तृतीयस्कन्धे

# ॥ श्रीकूर्मस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकूर्मस्तोत्रम् ॥

देवा ऊचुः

नमाम ते देव पदारविन्दं
    प्रपन्नतापोपशमातपत्रम्।
यन्मूलकेता यतयोऽञ्जसोरु
    सम्सारदुःखं बहिरुत्क्षिपन्ति ॥ 1 ॥

धातर्यदस्मिन् भव ईश जीवाः
    तापत्रयेणोपहता न शर्म।
आत्मल्लभन्ते भगवंस्तवाङ्घ्रि -
    च्छायां सविद्यामत आश्रयेम ॥ 2 ॥

मार्गन्ति यत्ते मुखपद्मनीडैः
    छन्दःसुपर्णैर्ऋषयो विविक्ते।
यस्याघमर्षोदसरिद्वरायाः
    पदं पदं तीर्थपदः प्रपन्नाः ॥ 3 ॥

यच्छ्रद्धया श्रुतवत्या च भक्त्या
    संमृज्यमाने हृदयेऽवधाय।
ज्ञानेन वैराग्यबलेन धीरा
    व्रजेम तत्तेऽङ्घ्रिसरोजपीठम् ॥ 4 ॥

विश्वस्य जन्मस्थितिसम्यमार्थे
    कृतावतारस्य पदाम्बुजं ते।

व्रजेम सर्वे शरणं यदीश
    स्मृतं प्रयच्छत्यभयं स्वपुंसाम्॥ 5॥

यत्सानुबन्धेऽसति देहगेहे
    ममाहमित्यूढदुराग्रहाणाम्।
पुंसां सुदूरं वसतोऽपि पुर्यां
    भजेम तत्ते भगवन् पदाब्जम्॥ 6॥

तान् वै ह्यसद्वृत्तिभिरक्षिभिर्ये
    पराहृतान्तर्मनसः परेश।
अथो न पश्यन्त्युरुगाय नूनं
    ये ते पदन्यासविलासलक्ष्म्याः॥ 7॥

पानेन ते देव कथासुधायाः
    प्रवृद्धभक्त्या विशदाशया ये।
वैराग्यसारं प्रतिलभ्य बोधं
    यथाञ्जसान्वीयुरकुण्ठधिष्ण्यम्॥ 8॥

तथापरे चात्मसमाधियोग -
    बलेन जित्वा प्रकृतिं बलिष्ठाम्।
त्वामेव धीराः पुरुषं विशन्ति
    तेषां श्रमः स्यान्न तु सेवया ते॥ 9॥

तत्ते वयं लोकसिसृक्षयाद्य
    त्वयानुसृष्टास्त्रिभिरात्मभिः स्म।
सर्वे वियुक्ताः स्वविहारतन्त्रं
    न शक्नुमस्तत्प्रतिहर्तवे ते॥ 10॥

यावद्बलिं तेऽज हराम काले
　　यथा वयं चान्नमदाम यत्र।
यथोभयेषां त इमे हि लोका
　　बलिं हरन्तोऽन्नमदन्त्यनूहाः॥ **11** ॥

त्वं नः सुराणामसि सान्वयानां
　　कूटस्थ आद्यः पुरुषः पुराणः।
त्वं देव शक्त्यां गुणकर्मयोनौ
　　रेतस्त्वजायां कविमादधेऽजः॥ **12** ॥

ततो वयं सत्प्रमुखा यदर्थे
　　बभूविमात्मन् करवाम किं ते।
त्वं नः स्वचक्षुः परिदेहि शक्त्या
　　देव क्रियार्थे यदनुग्रहाणाम्॥ **13** ॥

॥ इति श्रीकूर्मस्तोत्रं समाप्तम्॥